इति राजनिर्घण्टः ॥ (अस्य गुणादिकन्तमालशब्दे ज्ञेयम् ॥)

कालधर्म्मः, पुं, (कालस्य धर्म्मः । आयुषः परिणामकाले पञ्चत्वप्राप्तिरूपो धर्म्मः ।) मृत्युः । इत्यमरः । २ । ८ । ११६ ॥ समयस्य स्वभावः ॥ (यथा, रामायणे । २ । ७२ । ३७ ।
"कालधर्म्मपरिक्षिप्तः पाशैरिव महागजः" ॥)

कालनिर्य्यासः, पुं, (कालः कृष्णवर्णो निर्यासः ।) गुग्गुलुः । इति रत्नमाला ॥

कालनेमिः, पुं, (कालस्य मृत्योः नेमिरिव चक्रवत् ।) स्वनामख्यातराक्षसः । स च लङ्कापते रावणस्य मातुलः । यथा,—
"कालनेमिं दुराधर्षं रक्षःपरमदुर्जयम् ।
चतुरास्यं चतुर्हस्तमस्तनेत्रं भयावहम्" ॥
इति गोः रामायणे ६ । ८२ । ६४ ॥ दैत्यविशेषः । यथा,—श्रीभागवते ।
"आत्मानमिह संजातं जानन् प्राग्विष्णुना हतम् ।
महासुरं कालनेमिं यदुभिः स व्यरुध्यत" ॥
स तु हिरण्यकशिपुपुत्त्रः । इति हरिवंशः ॥ (कालचक्रम् ॥)

कालनेमिरिपुः, पुं, (कालनेमेः कालनेमिसंज्ञकासुरस्य रिपुः हन्ता ।) विष्णुः । इति शब्दरत्नावली ॥ (कालनेमे रावणमातुलस्य रिपुः हन्ता । हनुमान् । इति व्युत्पत्तिलब्धोऽर्थः ॥)

कालनेमिहा, [न्] पुं, (कालनेमिं तन्नामानं असुरं हतवान् । हन् + क्विप् ।) विष्णुः । इति त्रिकाण्डशेषः ॥ (यदुक्तं महाभारते १३ । १४९ । ८२ ।
"कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः" ॥
कालनेमिं स्वनामख्यातरावणमातुलं हतवानिति व्युत्पत्त्या हनूमान् ॥)

कालनेमी, [न्] पुं, (कालस्येव नेमिरस्त्यस्य व्रीह्यादेराकृतिगणत्वात् इनिः ।) कालनेमिः । इति द्विरूपकोषः ॥

कालनेम्यरिः, पुं, (कालनेमेः अरिः शत्रुः ।) विष्णुः । इति त्रिकाण्डशेषः ॥

कालपर्णः, पुं, (कालं कृष्णं पर्णं पत्रं यस्य ।) तगरवृक्षः । इति शब्दरत्नावली ॥

कालपालकं, क्ली, (कालं कृष्णवर्णं पालयति धारयतीति । काल + पाल + ण्वुल् ।) कङ्कुष्ठमृत्तिका । इति राजनिर्घण्टः ॥

कालपीलुकः, पुं, (कालः कृष्णः पीलुः । स्वार्थे कन् ।) कुपीलुः । इति भावप्रकाशः ॥ (गुणाः पर्य्यायाश्चास्य कुपीलुशब्दे बोद्धव्याः ॥)

कालपुरुषः पुं, (कालः कालचक्रं पुरुष इव ।) यमसहायः । इति जटाधरः ॥ ज्योतिःशास्त्रम् । यथा
"किन्त्वस्य कालपुरुषाख्यमहार्णवस्य
गच्छेत् कदाचिदनघैर्मनसापि पारम्" ॥
कालपुरुषः स चाख्या नाम यस्यासौ तस्य ज्योतिःशास्त्रविस्तीर्णसमुद्रस्य । इति भट्टोत्पलः ॥*॥ नराणां शुभाशुभज्ञानार्थं जन्मलग्नादिद्वादशराशिकल्पितपुरुषाकारः । यथा,—
"शीर्षमुखबाहुहृदयोदराणि कटिवस्तिगुह्यसंज्ञकानि । ऊरू जानुकजङ्घे चरणाविति च राश्योऽन्त्याद्याः" ॥ इति दीपिका ॥ * ॥ नराणां शुभाशुभज्ञानार्थं जन्मलग्नादिराशिद्रेक्काणघटितपुरुषाकारः । यथा, "कं दृक्श्रोत्रनसाकपोलहनवो वक्त्रञ्च होरादयस्ते कण्ठांसकबाहुपार्श्वहृदयक्रोड़ानिनाभिस्ततः । वस्तिः शिश्नगुदे ततश्च वृषणावूरू ततो जानुनी जङ्घाङ्घ्री त्वुभयत्र वाममुदितैर्द्रेक्काणभागैस्त्रिधा" ॥ इति "कालनरस्याङ्गे सदसद्ग्रहयोगतः । पुंसामपि तदङ्गेषु शुभाशुभफलं वदेत्" ॥ इति बृहज्जातकम् ॥

कालपृष्ठं, क्ली, (कालं कृष्णं पृष्ठं यस्य ।) कर्णधनुः । धनुर्मात्रम् । इति हेमचन्द्रः ॥

कालपृष्ठः, पुं, (कालं कृष्णवर्णं पृष्ठं पृष्ठभागो यस्य ।) कङ्कपक्षी । मृगविशेषः । इति हेमचन्द्रः ॥

कालपेषी, स्त्री, (पिष्यतेऽसौ । पिष् + कर्म्मणि घञ् । पेषः । कालः पेषः । ततः स्त्रियां ङीप् ।) श्यामालता । इति रत्नमाला ॥ (अस्याः पर्य्याया यथा ॥
"कालपेषी महाश्यामा सुमन्दोत्पलशारिवा ।
दीर्घमूला च पालिन्दीमसूरविदला च सा" ॥)

कालप्रभातं, क्ली, (कालं कृष्णं प्रभातं यत्र ।) शरदृतुः । शरत्कालः । इति त्रिकाण्डशेषः ॥

कालभाण्डिका, स्त्री, (कालभायै कृष्णप्रभायै खण्डति उपच्छति । खडि + ण्वुल् टाप् इत्वञ्च ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥

कालमानः, पुं, (कालो मन्यते यः शनैरितिशेषः । काल + मन + कर्म्मणि घञ् ।) कृष्णार्ज्जकः । इति रत्नमाला ॥ कालतुलसी इति भाषा । राजनिर्घण्टे लान्तशब्दोऽयम् ॥ (लकारान्तस्यास्य व्यवहारो यत्र तद्यथा ॥ सुश्रुते सूत्रस्थाने । ३८ अः ॥
"सुरसा-श्वेतसुरसा-फणिज्झकार्ज्जक-भूस्तृण-सुगन्धक-सुमुख-कालमाल-कासमर्द्द-क्षवक-खरपुष्पा-विडङ्ग-कट्फल-सुरसीत्यादयः, सुरसादिगणे ॥)

कालमुष्ककः, पुं, (कालो मुष्क इव कायति प्रकाशते । कै + कः ।) घण्टापारुलिवृक्षः । इति रत्नमाला ॥ (यस्मिन्नस्य व्यवहारस्तद्यथा,—
"प्रशस्तेऽहनि नक्षत्रे कृतमङ्गलपूर्ब्बकम् ।
कालमुष्ककमाहृत्य दग्ध्वा भस्म समाहरेत्" ॥
इति वैद्यकचक्रपाणिसंग्रहे अर्शोऽधिकारे कुटचित्त्वक्षारनामकौषधे ॥)

कालमूलः, पुं, (कालं मूलं यस्य ।) रक्तचित्रकवृक्षः । इति राजनिर्घण्टः ॥

कालमेशिका, स्त्री, (कालः मिश्यते कालोऽयमिति कथ्यते शनैरिति शेषः । मिश + कर्म्मणि घञ् गौरादित्वात् ङीष् ततः कन् टाप् ह्रस्वश्च ।) कालमेषिका । इत्यमरटीकायां रायमुकुटः ॥

कालमेशी, स्त्री, (कालमेश + ङीष्) कालमेषिका । इत्यमरटीकायां भरतः ॥

कालमेषिका, स्त्री, (कालं मिषति स्पर्द्धते स्वकान्त्या । मिष + अण् । गौरादित्वात् ङीष् स्वार्थे कन् टाप् ह्रस्वश्च ।) मञ्जिष्ठा । कृष्णत्रिवृता । इत्यमरः २ । ४ । १०९ ॥ अस्याः पर्य्याया यथा,—
"त्रिवृत्श्यामार्द्धचन्द्रा च पालिन्दी च सुषेणिका ।
मसूरविदला कोलकैषिका कालमेषिका" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे ॥)

कालमेषी, स्त्री, (कालमेष + ङीष् ।) सोमराजी । इत्यमरः । २ । ४ । ९६ ॥ (अस्याः पर्य्यायो यथा,—
"अवल्गुजो वाकुची स्यात् सोमराजी सुपर्णिका ।
शशिलेखा कृष्णफला सोमा पूतिफलीति च" ॥
सोमवल्ली कालमेषी कुष्ठघ्नी च प्रकीर्त्तिता ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे । गुणाश्चास्या वाकुचीशब्दे ज्ञेयाः ॥) मञ्जिष्ठा । इति शब्दरत्नावली ॥ त्रिवृत् । इति राजनिर्घण्टः ॥

कालरात्रिः, स्त्री, (कालः कालरूपा ब्रह्मैकदिने चतुर्द्दशमनूनामधिकारावसाने सृष्टिसंहारहेतुभूता रात्रिः ।) रात्रिविशेषः । सा तु कालः संहारः । मरणं तदुपलक्षिता रात्रिः कल्पान्तरात्रिरित्यर्थः । इति देवीमाहात्म्यटीकायां विद्याविनोदः ॥ भीमरथी । इति हारावली ॥ दुर्गायाः शक्तिविशेषः । यथा,—
"सा दुर्गा शक्तिभिः सार्द्धं काशीं रक्षति सर्व्वतः ।
ताः प्रयत्नेन संपूज्याः कालरात्रिमुखा नरैः" ॥
इति काशीखण्डम् ॥ (दीपावली । यथा,—
"दीपावली तु या प्रोक्ता कालरात्रिश्च सा मता" ।
इत्यागमवचनात् ।
क्रियायोग्यकालविशेषः । यदुक्तं दीपिकायाम् ।
"रवौ षष्ठं विधौ वेदं कुजवारे द्वितीयकम् ।
बुधे सप्त गुरौ पञ्च भृगुवारे तृतीयकम् ॥
शनावाद्यं तथा चान्त्यं रात्रौ कालं विवर्जयेत्" ॥)

कालरुद्रः, पुं, (कालः कालरूपः सर्व्वसंहारको रुद्रः ।) कालाग्निरुद्रः । यथा, देवीपुराणे,—
"येषु नः कालरुद्रस्य नानास्त्रीशतसङ्कुला ।
विचित्रहर्म्यविन्यासा कुतस्ते मेरुपृष्ठतः ॥
सा एव कालरुद्रस्य तनुरूपेण संस्थिता" ॥

काललवणं, क्ली, (कालं कृष्णवर्णं लवणम् ।) विड्लवणम् । इति रत्नमाला ॥
("न काललवणे गन्धः सौवर्च्चलगुणाश्च ते" ॥
इति चरके सूत्रस्थाने २७ अः ॥)

काललोहं, क्ली, (कालं कृष्णं लोहं आयसमित्यर्थः ।) कालायसम् । तिखा इति भाषा । तत्पर्य्यायः । कृष्णायसम् २ खड्गम् ३ तीक्ष्णम् ४ । इति रत्नमाला । (कालायसशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

कालवलनं, क्ली, (कलयति उपभुनक्ति विषयं । कल + णिच् + अच् । काल्यते प्रेर्य्यतेऽसौ कालेन वा णिच् कर्म्मणि घञ् । कालः कायः तस्य वलनं आवरणम् । वल संवरणे + करणे ल्युट् ।) वर्म्म । इति त्रिकाण्डशेषः ॥ कायवलनमिति साधुपाठः ॥

कालवृन्तः, पुं, (कालं वृन्तं यस्य ।) कुलत्थवृक्षः । इति रत्नमाला ॥

कालवृन्ती, स्त्री, (कालवृन्त + गौरादित्वात् ङीष् ।) पाटलावृक्षः । इति राजनिर्घण्टः ॥

कालवेला, स्त्री, (कालस्य वेला ।) क्रियानर्हकालविशेषः । सा तु रव्यादिवारे कालस्य शनेस्तत्तद्यामार्द्धरूपवेला । यथा । रवौ दिवा पञ्चमयामार्द्धं नक्तं षष्ठयामार्द्धम् । सोमे दिवा द्वितीययामार्द्धं